# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -आचार्यप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ५ | गुणाः - ७० |
| विषयः - ज्यौतिषशास्त्रम् | (C.E.- 4.1.1.New ) | |
| दिनाङ्कः - १९/१२/२०१८ | भारतीयकुण्डलीविज्ञानम् । | समयः -२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः कस्यचित् एकस्य व्याख्यां कुरुत । (५)**

*(अ) गतैष्यदिवसाद्येन गतिर्निघ्नी खषड्हृता ।*
*लब्धमंशादिना शोध्यं योज्यं स्पष्टो भवेद् ग्रहः ॥*

*(ब) खषडघ्नं भयातं भभोगोद्धृतं तत्खतर्कघ्नधिष्णेषु युक्तं द्विनिघ्नम् ।*
*नवाप्तं शशी भागपूर्वस्तुभुक्तिः खखाभ्राष्टवेदाभभोगेन भक्ताः ॥*

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । (१०)**

*(अ) लग्नानयम् ।* *(ब) त्रिविधेष्टकालसाधनम् ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्य उपरि व्याख्यां करोतु । (५)**

*(अ) अजवृषमृगाङ्गनाकर्किमीनवणिजांशकेष्विनाद्युच्चाः ।*
*दशशिख्यष्टाविंशतितिथीन्द्रियत्रिनवविंशेषु ।*

*(ब) एवं लंकोदयैर्भुक्तं भोग्यं शोध्यं पलीकृतात् ।*
*पूर्वपश्चान्नतादन्यत् प्रागवत्तद्दशमं भवेत् ॥*

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य सोदाहरणं निबन्धं लिखतु । (१०)**

*(अ) षडवर्गपरिचयपूर्वकं होरालग्नविचारः ।* *(ब) दशवर्गसाधनम् ।*

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः कस्यचित् एकस्य व्याख्यां करोतु । (५)**

*(अ) घटी चतुर्गुणाकार्या तिथ्याप्तैश्च पलैर्युता ।*
*शेषं पलाद्यं द्विगुणं स्पष्टभास्करसंयुतम् ॥*
*सूर्ये चरादिराशिस्थे शून्यनागाब्धिसंयुतम् ।*
*स्पष्टं प्राणपदं ज्ञेयमोजभावेऽङ्गशुद्धता ॥*

*(ब) चन्द्रराश्याधिपो यत्र तत्त्रिकोणमथापि वा ।*
*तत्सप्तमे त्रिकोणे वा संशये लग्ननिर्णयः ॥*

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य सोदाहरणपूर्वकं व्याख्यां करोतु ।** **( १० )**

*(अ) पारिजातादिवर्गविचारः (ब) सूर्यस्य कलाविकलाद्वाराफलसाधनप्रकारः ।*

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोलिखितेभ्यः कस्यचित् एकस्य उपरि व्याख्यां करोतु ।** **( ५ )**

*(अ) शिवघ्नोऽब्दः स्वखाद्रीन्दुलवाढ्यः खाग्निशेषितः ।*
*जन्मतिथ्यन्वितस्तत्र तिथावब्दप्रवेशनम् ॥*

*(ब) त्रिराशिपाः सूर्यसितार्किशुक्रा-दिने निशीज्येन्दुबुधक्षमाजाः ।*
*मेषाच्चर्णां हरिभाद्विलोमं नित्यं परेष्वार्किकुजेज्यचन्द्राः ॥*

**प्रश्नः ८ अधोलिखितयोः कस्यचित् एकस्य उपरि विवर्णनं करोतु ।** **( १० )**

*(अ) सारिणीद्वाराविंशोत्तरीदशासाधनम् । (ब) सारिणीद्वारा अष्टोत्तरीदशासाधनम् ।*

**पञ्चमान्वितिः**

**प्रश्नः ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लेख्यानि ।** **( १० )**

*(१) भारतीयकुण्डलीविज्ञानग्रन्थस्य लेखकः कः ?*
*(२) भारतीयकुण्डलीविज्ञानप्रथमप्रकरणस्य नाम किम् ?*
*(३) विष्कुम्भादियोगानां संख्या का ?*
*(४) कति वर्गाः सन्ति ?*
*(५) प्रथम अ वर्गस्य स्वामी कः ?*
*(६) मकरराशेः घातनक्षत्रं कः ?*
*(७) मकरराशेः हिंसकतत्त्वं किम् ?*
*(८) मेषराशेः लंकोदयमानं किम् ?*
*(९) अष्टोत्तरीदशावर्षसंख्या का ?*
*(१०) सूर्योदयात् जन्मभं यावत् कालस्यनाम् किम् ?*
*(११) ऊर्ध्वाङ्क इति शब्दस्य अर्थः कः ?*
*(१२) अमहाबादनगरस्य अक्षांशः कः ?*
*(१३) उत्तराक्षांशोत्तराक्रान्तिः, उदयार्थं चरमिनट किं भवति ?*
*(१४) देशान्तरं कति विधम् ?*
*(१५) किन्नां भभोगः ?*

--oo--